१

ज्

स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥ १॥
एतदिच्छाम्यहं श्रोतुं सर्वविच्चासि मे मतः ।
महर्षिणाभ्यनुज्ञातो व्यासेनाद्भुत कर्मणा ॥ २॥

वै

स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।
युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ॥ ३॥
स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ॥ ४॥
भ्राजमानामिवादित्यं वीर लक्ष्म्याभिसंवृतम् ।
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ॥ ५॥
ततो युधिष्ठिरो दृष्ट्व दुर्योधनममर्षितः ।
सहसा संनिवृत्तो ऽभूच्छ्रियं दृष्ट्वा सुयोधने ॥ ६॥
ब्रुवन्नुच्चैर्वचस्तान्वै नाहं दुर्योधनेन वै ।
सहितः कामये लोकाँल्लुब्धेनादीर्घ दर्शिना ॥ ७॥
यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महावने ॥ ८॥
द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी ।
परिक्लिष्टानवद्याङ्गी पत्नी नो गुरुसंनिधौ ॥ ९॥
स्वस्ति देवा न मे कामः सुयोधनमुदीक्षितुम् ।
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम ॥ १०॥
मैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव ।
स्वर्गे निवासो राजेन्द्र विरुद्धं चापि नश्यति ॥ ११॥
युधिष्ठिर महाबाहो मैवं वोचः कथं चन ।
दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ॥ १२॥
एष दुर्योधनो राजा पूज्यते त्रिदशैः सह ।
सद्भिश्च राजप्रवरैर्य इमे स्वर्गवासिनः ॥ १३॥
वीरलोकगतिं प्राप्तो युद्धे हुत्वात्मनस्तनुम् ।
यूयं स्वर्गे सुरसमा येना युद्धे समासिताः ॥ १४॥
स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति यो ऽभीतो बभूव पृथिवीपतिः ॥ १५॥
न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितम् ।
द्रौपद्याश्च परिक्लेशं न चिन्तयतुमर्हसि ॥ १६॥
ये चान्ये ऽपि परिक्लेशा युष्माकं द्यूतकारिताः ।
संग्रामेष्वथ वान्यात्र न तान्संस्मर्तुमर्हसि ॥ १७॥
समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै ।
स्वर्गो ऽयं नेह वैराणि भवन्ति मनुजाधिप ॥ १८॥
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह ॥ १९॥
यदि दुर्योधनस्यैते वीरलोकः सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवी सुहृददृहः ॥ २०॥

यत्कृते पृथिवी नष्टा सहया सरथ द्विपा ।
वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः ॥ २१॥
ये ते वीरा महात्मानो भ्रातरो मे महाव्रताः ।
सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ॥ २२॥
तेषामिदानीं के लोका द्रष्टुमिच्छामि तानहम् ।
कर्णं चैव महात्मानं कौन्तेयं सत्यसंगरम् ॥ २३॥
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ।
ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः ॥ २४॥
क्व नु ते पार्थिवा ब्रह्मन्नेतान्पश्यामि नारद ।
विराटद्रुपदौ चैव धृष्टकेतुमुखांश्च तान् ॥ २५॥
शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश्च सर्वशः ।
अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद ॥ २६॥

२

य्

नेह पश्यामि विबुधा राधेयममितौजसम् ।
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ ॥ १॥
जुहुवुर्ये शरीराणि रणवह्नौ महारथाः ।
राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ २॥
क्व ते महारथाः सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ॥ ३॥
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः ।
स्थितं वित्तहि मां देवाः सहितं तैर्महात्मभिः ॥ ४॥
कच्चिन्न तैरवाप्तो ऽयं नृपैर्लोको ऽक्षयः शुभः ।
न तैरहं विना वत्स्ये ज्ञातिभिर्भ्रातृभिस्तथा ॥ ५॥
मातुर्हि वचनं श्रुत्वा तदा सलिलकर्मणि ।
कर्णस्य क्रियतां तोयमिति तप्यामि तेन वै ॥ ६॥
इदं च परितप्यामि पुनः पुनरहं सुराः ।
यन्मातुः सदृशौ पादौ तस्याहममितौजसः ॥ ७॥
दृष्ट्वैव तं नानुगतः कर्णं परबलार्दनम् ।
न ह्यस्मान्कर्ण सहिताञ्जयेच्छक्रो ऽपि संयुगे ॥ ८॥
तमहं यत्र तत्रस्थं द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञातो मया यो ऽसौ घातितः सव्यसाचिना ॥ ९॥
भीमं च भीमविक्रान्तं प्राणेभ्यो ऽपि प्रियं मम ।
अर्जुनं चेन्द्र संकाशं यमौ तौ च यमोपमौ ॥ १०॥
द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीम् ।
न चेह स्थातुमिच्छामि सत्यमेतद्ब्रवीमि वः ॥ ११॥
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते स मम स्वर्गो नायं स्वर्गो मतो मम ॥ १२॥

देवअह्

यदि वै तत्र ते श्रद्धा गम्यतां पुत्र माचिरम् ।
प्रिये हि तव वर्तामो देवराजस्य शासनात् ॥ १३॥

वै

इत्युक्ता तं ततो देवा देवदूतमुपादिशम् ।
युधिष्ठिरस्य सुहृदो दर्शयेति परंतप ॥ १४ ॥
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १५ ॥
अग्रतो देवदूतस्तु ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १६ ॥
तपसा संवृतं घोरं केशशौवल शाद्वलम् ।
युक्तं पापकृतां गन्धैर्मांसशोणितकर्दमम् ॥ १७ ॥
दंशोत्थानं सझिल्लीकं मक्षिका मशकावृतम् ।
इतश्चेतश्च कुणपैः समन्तात्परिवारितम् ॥ १८ ॥
अस्थि केशसमाकीर्णं कृमिकीट समाकुलम् ।
ज्वलनेन प्रदीप्तेन समन्तात्परिवेष्टितम् ॥ १९ ॥
अयो मूखैश्च काकोलैर्गृध्रैश् च समभिद्रुतम् ।
सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम् ॥ २० ॥
मेदो रुधिरयुक्तैश्च छिन्नबाहूरुपाणिभिः ।
निकृत्तोदर पादैश्च तत्र तत्र प्रवेरितैः ॥ २१ ॥
स तत्कुणप दुर्गन्धमशिवं रोमहर्षणम् ।
जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन् ॥ २२ ॥
ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमाम् ।
असि पत्रवनं चैव निशितक्षुर संवृतम् ॥ २३ ॥
करम्भ वालुकास्तप्ता आयसीश्च शिलाः पृथक् ।
लोहकुम्भीश्च तैलस्य क्वाथ्यमानाः समन्ततः ॥ २४ ॥
कूटशाल्मलिकं चापि दुस्पर्शं तिक्ष्ण कण्टकम् ।
ददर्श चापि कौन्तेयो यातनाः पापकर्मिणाम् ॥ २५ ॥
स तं दुर्गन्धमालक्ष्य देवदूतमुवाच ह ।
कियदध्वानमस्माभिर्गन्तव्यमिदमीदृशम् ॥ २६ ॥
क्व च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ।
देशो ऽयं कश्च देवानामेतदिच्छामि वेदितुम् ॥ २७ ॥
स संनिववृते श्रुत्वा धर्मराजस्य भाषितम् ।
देवदूतो ऽब्रवीच्चैनमेतावद्गमनं तव ॥ २८ ॥
निवर्तितव्यं हि मया तथास्म्युक्तो दिवौकसैः ।
यदि श्रान्तो ऽसि राजेन्द्र त्वमथागन्तुमर्हसि ॥ २९ ॥
युधिष्ठिरस्तु निर्विण्णस्तेन गन्धेन मूर्छितः ।
निवर्तने धृतमनाः पर्यावर्तत भारत ॥ ३० ॥
स संनिवृत्तो धर्मात्मा दुःखशोकसमन्वितः ।
शुश्राव तत्र वदतां दीना वाचः समन्ततः ॥ ३१ ॥
भो भो धर्मज राजर्षे पुण्याभिजन पाण्डव ।
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ ३२ ॥
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः ।
तव गन्धानुगस्तात येनास्मान्सुखमागमत् ॥ ३३ ॥
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।
सुखमासादयिष्यामस्त्वां दृष्ट्वा राजसत्तम ॥ ३४ ॥
संतिष्ठस्व महाबाहो मुहूर्तमपि भारत ।
त्वयि तिष्ठति कौरव्य यतनास्मान्न बाधते ॥ ३५ ॥

एवं बहुविधा वाचः कृपणा वेदनावताम् ।
तस्मिन्देशे स शुश्राव समन्ताद्वदतां नृप ॥ ३६॥
तेषां तद्वचनं श्रुत्वा दयावान्दीनभाषिणाम् ।
अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः ॥ ३७॥
स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनः पुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पाण्डवः ॥ ३८॥
अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थमिह तिष्ठथ ॥ ३९॥
इत्युक्तास्ते ततः सर्वे समन्तादवभाषिरे ।
कर्णो ऽहं भीमसेनो ऽहमर्जुनो ऽहमिति प्रभो ॥ ४०॥
नकुलः सहदेवो ऽहं धृष्टद्युम्नो ऽहमित्युत ।
द्रौपदी द्रौपदेयाश्च इत्येवं ते विचुक्रुशुः ॥ ४१॥
ता वाचः सा तदा श्रुत्वा तद्देशसदृशीर्नृप ।
ततो विममृशे राजा किं न्विदं दैवकारितम् ॥ ४२॥
किं नु तत्कलुषं कर्मकृतमेभिर्महात्मभिः ।
कर्णेन द्रौपदेयैर्वा पाञ्चाल्या वा सुमध्यया ॥ ४३॥
य इमे पापगन्धे ऽस्मिन्देशे सन्ति सुदारुणे ।
न हि जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥ ४४॥
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजसुयोधनः ।
तथा श्रिया युतः पापः सह सर्वैः पदानुगैः ॥ ४५॥
महेन्द्र इव लक्ष्मीवानास्ते परमपूजितः ।
कस्येदानीं विकारो ऽयं यदिमे नरकं गतः ॥ ४६॥
सर्वधर्मविदः शूराः सत्यागम परायणाः ।
क्षात्र धर्मपराः प्राज्ञा यज्वानो भूरिदक्षिणाः ॥ ४७॥
किं नु सुप्तो ऽस्मि जागर्मि चेतयानो न चेतये ।
अहो चित्तविकारो ऽयं स्याद्वा मे चित्तविभ्रमः ॥ ४८॥
एवं बहुविधं राजा विममर्श युधिष्ठिरः ।
दुःखशोकसमाविष्टश्चिन्ताव्याकुलितेन्द्रियः ॥ ४९॥
क्रोधमाहारयच्चैव तीव्रं धर्मसुतो नृपः ।
देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ॥ ५०॥
स तीव्रगन्धसंतप्तो देवदूतमुवाच ह ।
गम्यतां भद्र येषां त्वं दूतस्तेषामुपान्तिकम् ॥ ५१॥
न ह्यहं तत्र यास्यामि स्थितो ऽस्मीति निवेद्यताम् ।
मत्संश्रयादिमे दूत सुखिनो भ्रातरो हि मे ॥ ५२॥
इत्युक्तः स तदा दूतः पाण्डुपुत्रेण धीमता ।
जगाम तत्र यत्रास्ते देवराजः शतक्रतुः ॥ ५३॥
निवेदयामास च तद्धर्मराज चिकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ५४॥

३

वै

स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्य देवाः शक्रपुरोगमाः ॥ १॥

स्वयं विग्रहवान्धर्मो राजानं प्रसमीक्षितुम् ।
तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः ॥ २ ॥
तेषु भास्वरदेहेषु पुण्याभिजन कर्मसु ।
समागतेषु देवेषु व्यगमत्तत्तमो नृप ॥ ३ ॥
नादृश्यन्त च तास्तत्र यातनाः पापकर्मिणाम् ।
नदी वैतरणी चैव कूटशाल्मलिना सह ॥ ४ ॥
लोहकुम्भ्यः शिलाश्चैव नादृश्यन्त भयानकाः ।
विकृतानि शरीराणि यानि तत्र समन्ततः ।
ददर्श राजा कौन्तेयस्तान्यदृश्यानि चाभवन् ॥ ५ ॥
ततो वयुः सुखस्पर्शः पुण्यगन्धवहः शिवः ।
ववौ देवसमीपस्थः शीतलो ऽतीव भारत ॥ ६ ॥
मरुतः सह शक्रेण वसवश्चाश्विनौ सह ।
साध्या रुद्रास्तथादित्या ये चान्ये ऽपि दिवौकसः ॥ ७ ॥
सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ।
यत्र राजा महातेजा धर्मपुत्रः स्थितो ऽभवत् ॥ ८ ॥
ततः शक्रः सुरपतिः श्रिया परमया युतः ।
युधिष्ठिरमुवाचेदं सान्त्वपूर्वमिदं वचः ॥ ९ ॥
युधिष्ठिर महाबाहो प्रीता देवगणास्तव ।
एह्येहि पुरुषव्याघ्र कृतमेतावता विभो ।
सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयास्तव ॥ १० ॥
न च मन्युस्त्वया कार्यः शृणु चेदं वचो मम ।
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ॥ ११ ॥
शुभानामशुभानां च द्वौ राशीपुरुषर्षभ ।
यः पूर्वं सुकृतं भुङ्क्ते पश्चान्निरयमेति सः ।
पूर्वं नरकभाग्यस्तु पश्चात्स्वगमुपैति सः ॥ १२ ॥
भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते ।
तेन त्वमेवं गमितो मया श्रेयो ऽर्थिना नृप ॥ १३ ॥
व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति ।
व्याजेनैव ततो राजन्दर्शितो नरकस्तव ॥ १४ ॥
यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा ।
द्रौपदी च तथा कृष्णा व्याजेन नरकं गताः ॥ १५ ॥
आगच्छ नरशार्दूल मुक्तास्ते चैव किल्बिषात् ।
स्वपक्षाश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास्तान्पश्य पुरुषर्षभ ॥ १६ ॥
कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः ।
स गतः परमां सिद्धिं यदर्थं परितप्यसे ॥ १७ ॥
तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो ।
स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ ॥ १८ ॥
भ्रातॄंश्चान्यांस्तथा पश्य स्वपक्षांश्चैव पार्थिवान् ।
स्वं स्वं स्थानमनुप्राप्तान्व्येतु ते मानसो ज्वरः ॥ १९ ॥
अनुभूय पूर्वं त्वं कृच्छ्रमितः प्रभृति कौरव ।
विहरस्व मया सार्धं गतशोको निरामयः ॥ २० ॥
कर्मणां तात पुण्यानां जितानां तपसा स्वयम् ।
दानानां च महाबाहो फलं प्राप्नुहि पाण्डव ॥ २१ ॥
अद्य त्वां देवगन्धर्वा दिव्याश्चाप्सरसो दिवि ।
उपसेवन्तु कल्याणं विरजोऽम्बरवाससः ॥ २२ ॥

राजसूय जिताँल्लोकानश्वमेधाभिवर्धितान् ।
प्राप्नुहि त्वं महाबाहो तपसश्च फलं महत् ॥ २३॥
उपर्युपरि राज्ञां हि तव लोका युधिष्ठिर ।
हरिश्चन्द्र समाः पार्थ येषु त्वं विहरिष्यसि ॥ २४॥
मान्धाता यत्र राजर्षिर्यत्र राजा भगीरथः ।
दौःषन्तिर्यत्र भरतस्तत्र त्वं विहरिष्यसि ॥ २५॥
एषा देव नदी पुण्या पर्थ त्रैलोक्यपावनी ।
आकाशगङ्गा राजेन्द्र तत्राप्लुत्य गमिष्यसि ॥ २६॥
अत्र स्नातस्य ते भावो मानुषो विगमिष्यति ।
गतशोको निरायासो मुक्तवैरो भविष्यसि ॥ २७॥
एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम् ।
धर्मो विग्रहवान्साक्षादुवाच सुतमात्मनः ॥ २८॥
भो भो राजन्महाप्राज्ञ प्रीतो ऽस्मि तव पुत्रक ।
मद्भक्त्या सत्यवाक्येन क्षमया च दमेन च ॥ २९॥
एषा तृतीया जिज्ञास तव राजन्कृता मया ।
न शक्यसे चालयितुं स्वभावात्पार्थ हेतुभिः ॥ ३०॥
पूर्वं परीक्षितो हि त्वमासीर्द्वैतवनं प्रति ।
अरणी सहितस्यार्थे तच्च निस्तीर्णवानसि ॥ ३१॥
सोदर्येषु विनष्टेषु द्रौपद्यां तत्र भारत ।
श्वरूपधारिणा पुत्र पुनस्त्वं मे परीक्षितः ॥ ३२॥
इदं तृतीयं भ्रातॄणामर्थे यत्स्थातुमिच्छसि ।
विशुद्धो ऽसि महाभाग सुखी विगतकल्मषः ॥ ३३॥
न च ते भ्रातरः पार्थ नरकस्था विशां पते ।
मायैषा देवराजेन महेन्द्रेण प्रयोजिता ॥ ३४॥
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः ।
ततस्त्वया प्राप्तमिदं मुहूर्तं दुःखमुत्तमम् ॥ ३५॥
न सव्यसाची भीमो वा यमौ वा पुरुषर्षभौ ।
कर्णो वा सत्यवाक्शूरो नरकार्हाश्चिरं नृप ॥ ३६॥
न कृष्णा राजपुत्री च नारकार्हा युधिष्ठिर ।
एह्येहि भरतश्रेष्ठ पश्य गङ्गां त्रिलोकगाम् ॥ ३७॥
एवमुक्तः स राजर्षिस्तव पूर्वपितामहः ।
जगाम सहधर्मेण सर्वैश्च त्रिदशालयैः ॥ ३८॥
गङ्गां देव नदीं पुण्यां पावनीमृषिसंस्तुताम् ।
अवगाह्य तु तां राजा तनुं तत्याज मानुषीम् ॥ ३९॥
ततो दिव्यवपुर्भूत्वा धर्मराजो युधिष्ठिरः ।
निर्वैरो गतसंतापो जले तस्मिन्समाप्लुतः ॥ ४०॥
ततो ययौ वृतो देवैः कुरुराजो युधिष्ठिरः ।
धर्मेण सहितो धर्मान्स्तूयमानो महर्षिभिः ॥ ४१॥

४

वै

ततो युधिष्ठिरो राजा देवैः सर्पि मरुद्गणैः ।
पूज्यमानो ययौ त्तत्र यत्र ते कुरुपुंगवाः ॥ १॥

ददर्श तत्र गोविन्दं ब्राह्मेण वपुषान्वितम् ।
तेनैव दृष्टपूर्वेण सादृश्येनोपसूचितम् ॥ २॥
दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितम् ।
चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ।
उपास्यमानं वीरेण फल्गुनेन सुवर्चसा ॥ ३॥
अपरस्मिन्नथोद्देशे कर्णं शस्त्रभृतां वरम् ।
द्वादशादित्य सहितं ददर्श कुरुनन्दनः ॥ ४॥
अथापरस्मिन्नुद्देशे मरुद्गणवृतं प्रभुम् ।
भीमसेनमथापश्यत्तेनैव वपुषान्वितम् ॥ ५॥
अश्विनोस्तु तथा स्थाने दीप्यमानौ स्वतेजसा ।
नकुलं सहदेवं च ददर्श कुरुनन्दनः ॥ ६॥
तथा ददर्श पाञ्चालीं कमलोत्पलमालिनीम् ।
वपुषा स्वर्गमाक्रम्य तिष्ठन्तीम् अर्कवर्चसम् ॥ ७॥
अथैनां सहसा राजा प्रष्टुमैच्छद्युधिष्ठिरः ।
ततो ऽस्य भगवानिन्द्रः कथयामास देवराट् ॥ ८॥
श्रीरेषा द्रौपदी रूपा त्वदर्थे मानुषं गता ।
अयोनिजा लोककान्ता पुण्यगन्धा युधिष्ठिर ॥ ९॥
द्रुपदस्य कुले जाता भवद्भिश्चोपजीविता ।
रत्यर्थं भवतां ह्येषा निमिता शूलपाणिना ॥ १०॥
एते पञ्च महाभागा गन्धर्वाः पावकप्रभाः ।
द्रौपद्यास्तनया राजन्युष्माकममितौजसः ॥ ११॥
पश्य गन्धर्वराजानं धृतराष्ट्रं मनीषिणम् ।
एनं च त्वं विजानीहि भ्रातरं पूर्वजं पितुः ॥ १२॥
अयं ते पूर्वजो भ्राता कौन्तेयः पावकद्युतिः ।
सूर्यपुत्रो ऽग्रजः श्रेष्ठो राधेय इति विश्रुतः ।
आदित्यसहितो याति पश्यैनं पुरुषर्षभ ॥ १३॥
साध्यानामथ देवानां वसूनां मरुताम् अपि ।
गणेषु पश्य राजेन्द्र वृष्ण्यन्धकमहारथान् ।
सात्यकिप्रमुखान्वीरान्भोजांश्चैव महारथान् ॥ १४॥
सोमेन सहितं पश्य सौभद्रमपराजितम् ।
अभिमन्युं महेष्वासं निशाकरसमद्युतिम् ॥ १५॥
एष पाण्डुर्महेष्वासः कुन्त्या माद्र्या च संगतः ।
विमानेन सदाभ्येति पिता तव ममान्तिकम् ॥ १६॥
वसुभिः सहितं पश्य भीष्मं शांतनवं नृपम् ।
द्रोणं बृहस्पतेः पार्श्वे गुरुमेनं निशामय ॥ १७॥
एते चान्ये महीपाला योधास्तव च पाण्डव ।
गन्धर्वैः सहिता यान्ति यक्षैः पुण्यजनैस्तथा ॥ १८॥
गुह्यकानां गतिं चापि के चित्प्राप्ता नृसत्तमाः ।
त्यक्त्वा देहं जितस्वर्गाः पुण्यवाग्बुद्धिकर्मभिः ॥ १९॥

५

ज्

भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः ।
विराटद्रुपदौ चोभौ शङ्खश्चैवोत्तरस्तथा ॥ १॥

धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित् ।
दुर्योधन सुताश्चैव शकुनिश्चैव सौबलः ॥ २॥
कर्ण पुत्राश्च विक्रान्ता राजा चैव जयद्रथः ।
घटोत्चकादयश्चैव ये चान्ये नानुकीर्तिताः ॥ ३॥
ये चान्ये कीर्तितास्तत्र राजानो दीप्तमूर्तयः ।
स्वर्गे कालं कियन्तं ते तस्थुस्तदपि शंस मे ॥ ४॥
आहोस्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम ।
अन्ये वा कर्मणः कां ते गतिं प्राप्ता नरर्षभाः ।
एतदिच्छाम्यहं श्रोतुं प्रोच्यमानं त्वया द्विज ॥ ५॥

सुउत

इत्युक्तः स तु विप्रर्षिरनुज्ञातो महात्मना ।
व्यासेन तस्य नृपतेराख्यातुमुपचक्रमे ॥ ६॥

वै

गन्तव्यं कर्मणामन्ते सर्वेण मनुजाधिप ।
शृणु गुह्यमिदं राजन्देवानां भरतर्षभ ।
यदुवाच महातेजा दिव्यचक्षुः प्रतापवान् ॥ ७॥
मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः ।
अगाध बुद्धिः सर्वज्ञो गतिज्ञः सर्वकर्मणाम् ॥ ८॥
वसूनेव महातेजा भीष्मः प्राप महाद्युतिः ।
अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ ॥ ९॥
बृहस्पतिं विवेशाथ द्रोणो ह्यङ्गिरसां वरम् ।
कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणम् ॥ १०॥
सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् ।
धृतराष्ट्रो धनेशस्य लोकान्प्राप दुरासदान् ॥ ११॥
धृतराष्ट्रेण सहिता गान्धारी च यशस्विनी ।
पत्नीभ्यां सहितः पाण्डुर्महेन्द्र सदनं ययौ ॥ १२॥
विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिव ।
निशठाक्रूर साम्बाश्च भानुः कम्पो विडूरथः ॥ १३॥
भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः ।
उग्रसेनस्तथा कंसो वसुदेवश्च वीर्यवान् ॥ १४॥
उत्तरश्च सह भ्रात्रा शङ्खेन नरपुंगवः ।
विश्वेषां देवतानां ते विविशुर्नरसत्तमाः ॥ १५॥
वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् ।
सो ऽभिमन्युर्नृसिंहस्य फल्गुनस्य सुतो ऽभवत् ॥ १६॥
स युद्ध्वा क्षत्रधर्मेण यथा नान्यः पुमान्क्व चित् ।
विवेश सोमं धर्मात्मा कर्मणो ऽन्ते महारथः ॥ १७॥
आविवेश रविं कर्णः पितरं पुरुषर्षभ ।
द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम् ॥ १८॥
धृतराष्ट्रात्मजाः सर्वे यातुधाना बलोत्कटाः ।
ऋद्धिमन्तो महात्मानः शस्त्रपूता दिवं गताः ।
धर्ममेवाविशत्क्षत्ता राजा चैव युधिष्ठिरः ॥ १९॥
अनन्तो भगवान्देवः प्रविवेश रसातलम् ।
पितामह नियोगाद्धि यो योगाद्गामधारयत् ॥ २०॥
षोडश स्त्रीसहस्राणि वासुदेव परिग्रहः ।
न्यमज्जन्त सरस्वत्यां कालेन जनमेजय ।
ताश्चाप्यप्सरसो भूत्वा वासुदेवमुपागमन् ॥ २१॥

हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः ।
घटोत्कचादयः सर्वे देवान्यक्षांश् च भेजिरे ॥ २२॥
दुर्योधन सहायाश्च राक्षसाः परिकीर्तिताः ।
प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान् ॥ २३॥
भवनं च महेन्द्रस्य कुबेरस्य च धीमतः ।
वरुणस्य तथा लोकान्विविशुः पुरुषर्षभाः ॥ २४॥
एतत्ते सर्वमाख्यातं विस्तरेण महाद्युते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च भारत ॥ २५॥

सुउत

एतच्छ्रुत्वा द्विजश्रेष्ठात्स राजा जनमेजयः ।
विस्मितो ऽभवदत्यर्थं यज्ञकर्मान्तरेष्वथ ॥ २६॥
ततः समापयामासुः कर्म तत्तस्य याजकाः ।
आस्तीकश्चाभवत्प्रीतः परिमोक्ष्य भुजंगमान् ॥ २७॥
ततो द्विजातीन्सर्वांस्तान्दक्षिणाभिरतोषयत् ।
पूजिताश्चापि ते राज्ञा ततो जग्मुर्यथागतम् ॥ २८॥
विसर्जयित्वा विप्रांस्तान्राजापि जनमेजयः ।
ततस्तक्षशिलायाः स पुनरायाद्गजाह्वयम् ॥ २९॥
एतत्ते सर्वमाख्यातं वैशम्पायन कीर्तितम् ।
व्यासाज्ञया समाख्यातं सर्पसत्त्रे नृपस्य ह ॥ ३०॥
पुण्यो ऽयमितिहासाख्यः पवित्रं चेदमुत्तमम् ।
कृष्णेन मुनिना विप्र नियतं सत्यवादिना ॥ ३१॥
सर्वज्ञेन विधिज्ञेन धर्मज्ञानवता सता ।
अतीन्द्रियेण शुचिना तपसा भावितात्मना ॥ ३२॥
ऐश्वर्ये वर्तता चैव सांख्ययोगविदा तथा ।
नैकतन्त्र विबुद्धेन दृष्ट्वा दिव्येन चक्षुषा ॥ ३३॥
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।
अन्येषां क्षत्रियाणां च भूरि द्रविण तेजसाम् ॥ ३४॥
य इदं श्रावयेद्विद्वान्सदा पर्वणि पर्वणि ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय गच्छति ॥ ३५॥
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥ ३६॥
अह्ना यदेनः कुरुते इन्द्रियैर्मनसापि वा ।
महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ॥ ३७॥
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क चित् ॥ ३८॥
यजो नामेतिहासो ऽयं श्रोतव्यो भूतिमिच्छता ।
रज्ञा राजसुतैश्चापि गर्भिण्या चैव योषिता ॥ ३९॥
स्वर्गकामो लभेत्स्वर्गं जय कामो लभेज्जयम् ।
गर्भिणी लभते पुत्रं कन्यां वा बहु भागिनीम् ॥ ४०॥
अनागतं त्रिभिर्वर्षैः कृष्णद्वैपायनः प्रभुः ।
संदर्भं भारतस्यास्य कृतवान्धर्मकाम्यया ॥ ४१॥
नारदो ऽश्रावयद्देवानसितो देवलः पितॄन् ।
रक्षोयक्षाञ्शुको मर्त्यान्वैशम्पायन एव तु ॥ ४२॥
इतिहासमिमं पुण्यं महार्थं वेद संमितम् ।
श्रावयेद्यस्तु वर्णांस्त्रीन्कृत्वा ब्राह्मणमग्रतः ॥ ४३॥

स नरः पापनिर्मुक्तः कीरितं प्राप्येह शौनक ।
गच्छेत्परमिकां सिद्धिमत्र मे नास्ति संशयः ॥ ४४ ॥
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ ४५ ॥
महर्षिर्भगवान्व्यासः कृत्वेमां संहितां पुरा ।
श्लोकैश्चतुर्भिर्भगवान्पुत्रमध्यापयच्छुकम् ॥ ४६ ॥
माता पितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥ ४७ ॥
हर्षस्थान सहस्राणि भयस्थान शतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ ४८ ॥
ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ४९ ॥
न जातु कामान्न भयान्न लोभाद्
धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ५० ॥
इमां भारत सावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारत फलं प्राप्य परं ब्रह्माधिगच्छति ॥ ५१ ॥
यथा समुद्रो भगवान्यथा च हिमवान्गिरिः ।
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥ ५२ ॥
महाभारतमाख्यानं यः पठेत्सुसमाहितः ।
स गच्छेत्परमां सिद्धिमिति मे नास्ति संशयः ॥ ५३ ॥
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥ ५४ ॥